Regd. No. KA/SK/MYS-107/09-11
R.N.I. No. 20007/70
E-mail : sudharma.sanskritdaily@gmail.com
E-paper : http://sudharma.epapertoday.com
Phone : 0821-2442835 / 4287835

|| श्रीः ||
|| धर्मो रक्षति रक्षितः ||
ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।

स्थापना : १९७०

# सुधर्मा

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता

## अद्वितीया संस्कृतदिनपत्रिका

सम्पादकः
के.वि. सम्पत्कुमार्
गौरवसम्पादकौ
विद्वान् एच्.वि. नागराजराव्
विद्वान् डा० टि.वि. सत्यनारायण

SUDHARMA, THE ONLY SANSKRIT DAILY, MYSORE- 570 004
(संस्थापक सम्पादकः-गीर्वाणवाणीभूषणं विद्यानिधिःपण्डित कळले नडादूरु वरदराजय्यङ्गार्यः)

ANNUAL SUBSCRIPTION
Rs. 300/- p.a.
(inclusive of postage)

सम्पुटः ४० | मैसूरुनगरम् | मूल्यम् : १.५० | सञ्चिका : २०९

स्वस्तिश्री विरोधिनामसंवत्सरे उत्तरायणे शिशिरऋतौ फाल्गुणमासे कृष्णपक्षे दशम्यां पूर्वाषाढानक्षत्रयुक्तः
१० मार्च २०१० बुधवासरः

## सुभाषितम्

गुणवज्जनसंसर्गाद्याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥
सुत्सु कार्यवतां पुंसामलमेवाग्रतः स्थितिः।
वाग्वृत्तिरधिका सा चेत् करोत्युभयलाघवम् ॥

## बिळिगिरिरङ्गशैले वह्निः

यळन्दूरु - अत्र बिळिगिरिरङ्गशैलारण्ये अकस्मादुत्थितोऽग्निः सहस्रशो वृक्षान् भस्म अकरोत् । तत्रत्याः नाना जन्तवः पक्षिणः सरीसृपाश्च अग्नेराहुतयोऽभवन् ।

ज्वलन्तम् अग्निं शमयितुम् अग्निशामकदलस्य योधा बहुधा प्रयत्नशीलाः सन्ति । किन्तु निदाघोष्मणः कारणात् समीपे जलं न लभ्यते इति हेतोः वृक्षाः भस्मसाद् भवन्ति ।

केचन दुष्टाः सोद्देशम् एव वनं नाशयितुम् अग्निम् उद्दीपितवन्तः इति अरण्यपालका वदन्ति। चतुर्भ्यो वर्षेभ्यः प्रागपि एवम् अग्निकाण्डेन वनं नाशितम् । पदेपदे एवं जायमानेऽपि विनाशे, अरण्यस्य रक्षणाय किमपि न क्रियते इत्याश्चर्यम् । तत्र तत्र विशालाः कुल्याः करणीयाः, सरांसि निर्माणीयानि, येभ्यः जलम् आहृत्याग्निशमनं शक्येत। अतः इदानीमपि जागरूकतया वनसंरक्षणाय क्रमाः अनुष्ठेयाः। अन्यथा कुलालस्य वार्षिकः श्रमः कुलशत्रुणा क्षणमात्रे ध्वंसितः इति गाथानुसारेण अरण्यं नष्टं भविष्यति । कोटिशो हानिर्भवति अग्निा, तत्परिहाराय पूर्वं लक्षस्य व्ययः किं न क्रियते ? न कूपखननं युक्तं प्रदीप्ते वह्निना वने इति प्राचीनोक्तिर्न विस्मरणीया ।

## एकचत्वारिंशत्तम वार्षिकोत्सवः

अद्वितीयायाः "सुधर्मा" संस्कृतदिनपत्रिकायाः एकचत्वारिंशत्तम वार्षिकोत्सवः जुलैमासे आचरितुं उद्दिश्यते । अस्मिन् सन्दर्भे संस्कृतक्षेत्रे गणनीयसेवां कृतवतः संस्कृत विदुषां तथा ऐषम वर्षतः संस्कृत कलाक्षेत्रेऽपि अतितमां सेवां कृतवतः तथा महिलानां च सम्माननं कर्तुं उद्दिश्यति । अवसरेऽस्मिन् १०० पुटस्य ग्रन्थं लोकाय अर्पितुं पत्रिका इच्छति । संस्कृताभिमानिनः तथा विद्वज्जनानां विविध विषयेऽपि लेखनं दत्वा संस्कृत क्षेत्रे चत्वारिंशत्तवर्षपर्यन्तं सेवां कृतवतः 'सुधर्मा' संस्कृतदिन पत्रिकां विज्ञापिका प्रदातॄणां धन साहाय्येन, लेखन प्रेषणेन च प्रोत्साहनं दीयतां इति प्रार्थयामि। सुधर्मा पूर्वमेव उद्देष्टिस्य ४० संस्कृत पुस्तकानि गण्यानां सम्मुखे प्रचलिते समारम्भे विमोचितम् उद्दिश्यते । प्रोत्साहनार्थं २५० रूप्यकं बहुमानं च प्रदातुं निश्चितम् । संस्कृत विद्वांसः शीघ्रातिशीघ्रं उत्तमानि लेखनानि दत्वा इदं कार्ये प्रोत्सहनियमिति प्रार्थयति । सुधर्मा पत्रिकायाः समारम्भस्य आह्वान पत्रिकां सुधर्मायां प्रकटयिष्यति। सर्वे संस्कृताभिमानिनः कार्यक्रमे भागमावहनाय कार्यक्रमं यशस्विनं करोतु इति पुनः प्रार्थयामि ।

# राज्यसभायां विधेयकं पारितम्

नवदिल्ली - महिलारक्षणविधेयकं मङ्गळवासरे राज्यसभया पारितम्। देशस्य सर्वाः महिलासंघटनाः एतत् स्वागतीकृत्य हर्षं प्राकटयन्।

राज्यसभायां षडशीत्युत्तर-शतसंख्याः सदस्याः विधेयकं समार्थयन्त । एक एव सदस्यो विरोधमतं प्रादात् । लोकसभायां राज्यसभायां देशस्य सर्वासु विधानसभासु च प्रतिशतं त्रयस्त्रिंशत् स्थानानि महिलानां कृते आरक्ष्यन्ते इतः परम् । विधेयकं लोकसभायाः सम्मतिं बुधवासरे प्राप्स्यत इति भावयामः।

एतेन देशे महिलानां विषये दौर्जन्यं निवारयिष्यते, शासनाधि-कारे महिलानां ध्वनिः दृढतरो भविष्यति । शतशतमानैः पुरुष-प्राधान्यं यत् प्रवृत्तं तदद्यापनीतम्। पुरुषसमाना महिलाः इति भारतवर्षं दर्शयति ।

माता सुतां सोदरी भार्या च या स्त्री भवति समाजे, सा समानान् अधिकारान् प्राप्नोति इति युक्ततमम्। राज्यसभायाः सदस्यान् अभिनन्दति सुधर्मा ।

## वनराजस्य आहारो नास्ति

जोहान्स्बर्ग् - दक्षिणाफ्रिकादेशे सिंहाः क्षुत्क्षामकुक्षयः सन्ति । रक्षितारण्ये स्वयं मृगयां कृत्वा उदरं पूरयितुं मृगराजो न शक्नोति। जनाः तस्मै मांसं ददति । एवं कर्तुं च एककस्मै सिंहाय नियतं मांसं देयं भवति । चेति षोडश रक्षिताः प्राणिनः सन्ति । तेषाम् आहाराय प्रतिमासं चतुस्सहस्रपौण्ड्परिमितं धनम् अपेक्ष्यते । तावद्धनं को दास्यति ? प्राणिप्रियाः दानं ददतु इति रक्षितारण्याधिकारिणः प्रार्थयन्ते ।

यदि धनं न लभ्यते, तर्हि सिंहानाम् उपवासोऽनिवार्यो भविष्यति । सिंहानां सन्ततेः वृद्धिर्मास्तु इति सिंहा निर्बीजाः कृताः । उत्तरत्र धनाभावे तेषां हननम् अपि अनिवार्यं भविष्यतीति अरण्यपालकाः कथयन्ति ।

सिंहान् एव हन्तुं क्वचित् मृगयाम् आरचयन्ति । सर्वकार एतादृशीं मृगयां निषेद्धुम् इच्छति। तथा कृते सिंहानां संख्या अतीव वर्धेत । तदा कथं तेषां पालनम्? अरण्ये स्वयम् आहारं नैव लभन्ते। अतो महतीयं समस्या।

## श्रीरङ्गक्षेत्रे तिरुनक्षत्रम्

श्रीरङ्गम्- श्रीरङ्गम् श्रीमदाण्डवन् परवाकोट्यै श्री श्री गोपालदेशिक महादेशिकानां ९०तम तिरुनक्षत्रमहोत्सवः श्रीरङ्गक्षेत्रे २१-३-२०१० भानुवासरे प्रचलिष्यति । प्रातः अष्टवादने पारायणम्, पादुकाराधनम्, शातुमरै, सम्भावनं, उपन्यास कार्यक्रमं तथा तीर्थप्रसादं च करिष्यति इति प्रकटनम् सूचयति ।

## चेन्नैनगरे तिरुनक्षत्रम्

चेन्नै - श्रीरङ्गम् श्रीमदाण्डवन् परवाकोट्यै श्री श्री गोपालदेशिक महादेशिकानां तिरुनक्षत्रमहोत्सव। चेन्नैनगरस्य तिरुनीरमलै नूतन आश्रमे १४-३-२०१० भानुवासरे प्रचलिष्यति । प्रातः अष्टवादने पारायणम्, पादुकाराधनम्, शातुमरै, सम्भावनं तथा तीर्थप्रसादं च करिष्यति इति प्रकटनम् सूचयति ।